# ।। श्रीमद्वामनमहापुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

प्रथमाध्यायः

पुराणपीठिका - विष्णुः कुतो वा वामनोऽभूत् ? वैष्णवोऽपि प्रह्लादो देवैः साकं कुतोऽयुध्यत । शङ्करस्य प्रियपत्नी दक्षपुत्री कुतो वा देहमत्यजत् ? सा पुनर्हैमवती भूत्वा शङ्करस्य पत्न्यभूत् तद्वृत्तान्तं, तीर्थाणां महिमा, दानानां प्रशस्तिः, नानाव्रतानि च ज्ञपयेति पुलस्त्यं नारदोऽपृच्छत् । एतेषां प्रश्नानां परिहारो वामनपुराणेऽस्तीति पुलस्त्यो मुनिर्नारदाय पुराणमिदं ब्रवीत् ।

हरो जीमूतकेतुः- एकदा देवी हैमवती ग्रीष्मावसरे घर्माद्रक्षणार्थं रुद्रं प्रार्थयामास । 'हे महादेव ! वातातपवर्षेभ्योः रक्षणार्थं निकाय्यमावश्यकमिति । तदाऽब्रवीत् महादेवः 'हे देवि ! अहं निराश्रितः, वने सञ्चरणशीलः । अस्मिन् वटछायां स्थित्वा घर्मादस्मात् पारयावः' इति । ततो मेघमालावृतो भास्करमण्डलः बभूव । सर्वत्र घनान्धकारो व्याप्तः । मेघनिर्घोषाद्धंसाः बिभ्युः । मयूरा ननृतुः । वातरभसेन वृक्षा वृक्षशाखाश्च तृटिता बभूवुः । वृक्षेभ्यः फलानि पुष्पाणि च भूम्यां निपेतुः । तदा भीतेव देवी देवमब्रवीत् । 'हे देव शीतवर्षाभ्यां रक्षणार्थं गृहमेकमावश्यकम्' इति । देवोऽब्रवीत् 'अहं निर्धनः, नागाभरणः । एभ्यो वर्षधारेभ्य ऊर्ध्वं गच्छावः न तत्र वर्षातपशीतपीडा । एवं देवौ मेघमण्डलादूर्ध्व गतौ । अतस्तं देवं 'जीमूतकेतुः' इति व्यवहरन्ति ।

अध्यायेऽस्मिन् ग्रीष्मवर्षर्तोर्वर्णनमतीवसमीचीनं काव्यरमणीयं रसिकानां रसभोजनम् ।

पञ्चनवतितमोऽध्यायः

विष्ण्वागधमहिमा - हरेः प्रीत्यर्थं कस्मिन् दिने उपोषणं कायम् ? कस्मै किं देयम् ? एवं यत्कर्मेभ्यो हरिः प्रीणाति ? इति बलिना पृष्टः प्रह्लादोऽब्रवीत् । हे बले श्रद्धायुक्तः यत्किञ्चिद् दानेनापि हरेः प्रीतिमाप्नुयात् । तदक्षयाय भवति । सद्विजपूजनेन जनार्दनः पूजितोभवति । हरेः हरिभक्तानां च द्वेष्टा तस्मै नरकं निश्चयम् । हरिरेवाब्रवीत् पूर्वम् 'ब्राह्मणा मामकीतयोनुः' इति । यानि सुगन्धीनि पुष्पाणि तैरभ्यर्चयेद्धरिम् । जाती, चम्पकं, बकुलं, जपाकुसुममित्यादीनि विशेषतो हरेः प्रियकराणि कुसुमानि । एतानि प्रशस्तानि । परं सुरभीमपि केतकीं नार्पयेद्धरये । पत्रेषु बिल्वपत्रं, शमीपत्रं, भृङ्गराजं, दूर्वाणि प्रशस्तानि । सुसंस्कृतानि यवगोधूमशालि-तिलमुद्गादिमयानि हवींषि समर्पयेत् । गोदान-भूदान-हिरण्यदान-वस्त्रदानान्नादिदानेन हरिः प्रीणाति । एवं माघमासे तिलधेनुदानेन, फाल्गुने व्रीहिमुद्गावस्त्राजिनदानेन, चैत्रे शयनदानेन, गन्धपुष्पादि दानेन च हरेरत्यर्थप्रसादस्य प्रात्रा भवन्ति । एवं माघादन्यमासेषु क्षीरदधिशाख-घृतहिरण्यभवनादिदानेन हरेः प्रसादात् इहपरे च सुखिनो भवन्ति ।

यद्यदिष्टतमं किञ्चित् तत्तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे ।।

'यः कारयेत् मन्दिरं केशवस्य पुण्यान् लोकान् स जयेत् शाश्वतान् वै'

पितर एवं गायन्ति स्म—

अपि नः स कुले कश्चिद् विष्णुभक्तो भविष्यति ।

हरिमन्दिरकर्ता यो भविष्यति शुचिव्रतः ।।

अपि नः सन्ततौ जायेद् विष्वालयविलेपनम् ।

सम्मार्जनं च धर्मात्मा करिष्यति च भक्तितः ।

हरिकैङ्कर्यकारिणः यः कोऽपि जायत इति । इत्यादि ।

पुराऽसीत् ज्यामघो नाम यादवः सः स्वपित्राशयं श्रुत्वात थैवारचयत् देवमन्दिरम् ।

हे बले ! त्वमपि पौराणिकान् सदाचारिणः, दीनान्, अङ्गविकलान् दानादिभिः पूजयस्व । नानेन प्रजाः सीदन्ति । शुभान्यवाप्स्यसि इति । बलिस्तु स्वपितामहादेशानुसारेणातिसुन्दरं देवमन्दिरं निर्ममे ।

आपद्भुजङ्गदष्टस्य मन्त्रहीनस्य सर्वदा ।

वृद्धवाक्यौषधा नूनं कुर्वन्ति किल निर्विषम् ।।

वृद्धावाक्यामृतं पीत्वा तदुक्तमनुमन्य च ।

या तृप्तिर्जायते पुंसां सोमपाने कुतस्तथा ।।

षण्णवतितमोऽध्यायः

पुराणपरिमाप्तिः -

यथापापानि पूयन्ते गङ्गा वारिविगाहनात् ।

तथा पुराणश्रवणाद् दुरितानां विनाशनम् ।।

न तस्य रोगा जायन्ते न विषं चाभिचारिकम् ।

शरीरे च कुले ब्रह्मन् यः श्रुणोति च वामनम् ।।

वामनपूराणं यो भक्त्या श्रुणोति राजसूयाश्वमेधसौत्रामण्यादियागकरणाद् यावन्ति पुण्यान्याप्नोति तदधिकानि पुण्यान्याप्नोति सः । नाभाक्तायेदं पुराणमुपदिशेत् । पुराणश्रवणानन्तरं वाचकाय गोहिरण्यभूम्यादिकं प्रदद्यात् स्ववैभवानुसरेण न वित्तशाठ्यं कुर्यात् ।

समाप्तमिदं वामनमहापुराणम्

*****